**2015**

**M. A.**

**1st Semester Examination**

**SANSKRIT**

**PAPER—SAN-101**

*Full Marks* : 40

*Time* : 2 Hours

*The figures in the right hand margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

1. अधोनिर्दिष्टेषु **मन्त्रद्वयं** सरलसुरगिरा व्याख्येयम् ऋषिच्छन्दोदैवतनिर्देशपूर्वकम् : 6×2

a) अग्ने यं यज्ञमध्वरं

विश्वतः परिभूरसि ।

स इद्देवेषु गच्छति ॥

(Turn Over)

b) मित्रं हुवे पूतदक्षं

वरुणं च रिशादसम् ।

धियं घृताचीं साधन्ता ॥

c) येन कर्माण्यपसो मनीषिणो

यज्ञे कृण्वन्ति विदथेषु धीराः ।

यदपूर्वं यक्षमन्तः प्रजानां

तन्मे मनः शिवसंकल्पमस्तु ॥

d) पुरुष एवेदं सर्वं

यद्भूतं यच्च भव्यम् ।

उतामृतत्वस्येशानो

यदन्नेनातिरोहति ॥

e) सत्यं बृहदृतमुग्रं दीक्षा तपो

ब्रह्म यज्ञः पृथिवीं धारयन्ति ।

सा नो भूतस्य भव्यस्य पत्न्युरुं

लोकं पृथिवी नः कृणोतु ॥

2. अधस्तनयोरे**कतरस्य** भाष्यवचनस्याशयः संस्कृतभाषामाश्रित्य देवनागरीलिप्या स्फुटीक्रियताम् – 6

a) तस्मिन् सूक्ते प्रथमाया ऋचो द्वितीयस्यां पवमानेष्टौ स्विष्टकृतो याज्यात्वेन विनियोगः ।

b) वायव्ये तृचे प्रथमा ग्रहस्यैन्द्रवायवस्यैका पुरोऽनुवाक्या ।

3. अधःस्थेषु यथेच्छं पदद्वयस्य साधनप्रक्रिया संस्कृतभाषया प्रदर्शनीया — 2×2

a) दीदिविम्

b) दाशुषे

c) उरूची

d) कृण्वन्ति

4. इन्द्रस्य उषसो वा वैदिकदेवतायाः स्वरूपं संक्षेपेण उपस्थातव्यम् । 8

अथवा

कालसूक्तस्य वैशिष्ट्यं प्रतिपाद्यताम् ।

5. अधःसमुद्धृतं ब्राह्मणसन्दर्भद्वयं सरलसुरगिरा देवनागरीलिप्यां साधु व्याख्यायताम् — 5×2

i) कलि शयानो भवति, संजिहानस्तु द्वापरः ।
उत्तिष्ठंस्त्रेता भवति, कृतं संपद्यते चरन् ॥

ii) तस्य वा एतस्य ब्रह्मयज्ञस्य चत्वारो वषट्काराः ।

iii) अहरहः स्वाहा कुर्यादा काष्ठात् तथैनंह देवयज्ञं समाप्नोति ।

अथवा

शुनःशेपोपाख्यानं कस्मन् ब्राह्मणभागन्तर्गतम् ? आख्यानस्य वैशिष्ट्यं प्रतिपाद्यताम् । 10

——o——